बिल्वपत्रैरखण्डैश्च यो लिङ्गं पूजयेत् सकृत् ।
सर्व्वपापैर्विनिर्म्मुक्तः शिवलोके महीयते ॥”
तथा ।
“सर्व्वकामप्रदं बिल्वं दारिद्र्यस्य प्रणाशनम् ।
बिल्वपत्रात् परं नास्ति येन तुष्यति शङ्करः ॥”
तथा ।
“केशकीटापविद्धानि निशि पर्य्युषितानि च ।
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥”
तथा ।
“देवदारुसमेतञ्च सर्ज्जश्रीवासकुन्दुरुम् ।
श्रीफलं चाज्यमिश्रन्तु दत्त्वाप्नोति परां गतिम्”
सर्ज्जः शालरसः । श्रीवासः सरलद्रवः । कुन्दुरुः शैलेयम् ।
“एभ्यः सौगन्धिकं धूपं षट्सहस्रगुणोत्तरम् ।
अगुरुं शतसाहस्रं द्विगुणञ्चासितागुरुम् ।
गुग्गुलुं घृतसंयुक्तं साक्षात् गृह्णाति शङ्करः ॥”
तथा ।
“तैलेनापि हि यो दद्यात् घृताभावेन मानवः ।
तेन दीपप्रदानेन शिववद्भाजते भुवि ॥”
नन्दिकेश्वरे ।
“अथ भक्त्या शिवं पूज्य नैवेद्यमुपकल्पयेत् ।
यद्यदेवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ॥”
शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम् ।
शिवाय तं चरुं दद्यात् चतुर्द्दश्यां विशेषतः ॥”
प्रस्थमानं प्रागुक्तम् । शिवसर्व्वस्वे स्कान्दम् ।
“एकमाम्रफलं पक्वं यः शम्भोर्विनिवेदयेत् ।
वर्षाणामयुतं भोगैः क्रीडति स शिवे पुरे ॥
एकं मोचाफलं पक्वं यः शिवाय निवेदयेत् ।
वर्षलक्षं तथाभोगैः शिवलोके महीयते ॥”
शिवपुराणे ।
“नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत् ।
अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः ॥”
शिवसर्व्वस्वे स्कान्दम् ।
“परिपक्वं सुसंसृष्टमाज्यसिक्तं सुसंस्कृतम् ।
शिवाय मांसं दत्त्वा तु शृणु यत् फलमाप्नुयात् ॥
अशेषफलदानेन यत् फलं परिकीर्त्तितम् ।
तत् फलं प्राप्नुयान्नित्यं सर्व्वं मांसनिवेदनात् ॥”
शिवधर्म्मे ।
“लिङ्गवेदी भवेद्देवी लिङ्गं साक्षात् महेश्वरः ।
तयोः संपूजनात् स्यातां देवी देवश्च पूजितौ ॥”
देवीपुराणे ।
“सव्यं व्रजेत्ततोऽसव्यं प्रणालं नैव लङ्घयेत् ।
एकीभूतमना रुद्रे यः कुर्य्यात् त्रिः प्रदक्षिणम् ॥
क्लिष्टस्तेन भुवश्चान्यैर्न तस्य पुनरुद्भवः ॥”
भविष्ये ।
“जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशे सर्व्वान् कामानवाप्नुयात् ॥”
लिङ्गपुराणे ।
“गन्धपुष्पनमस्कारैर्मुखवाद्यैश्च सर्व्वशः ।
यो मामर्च्चयते तत्र तदा तुष्याम्यहं सदा ॥”
महाभारते ।
“सर्व्वलक्षणहीनोऽपि युक्तो वा सर्व्वपातकैः ।
सर्व्वं तरति तत् पापं भावयन् शिवमात्मना ।
राघवभट्टधृतम् ।
“अधोमुखे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्तकम् ।
क्षिप्ताङ्गुलीरङ्गुलीभिः संगृह्य परिवर्त्तयेत् ।
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते ॥”
अर्पणे आत्मनीति शेषः । स्कान्दे ।
“निर्म्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते ।
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥”
शुचिः स्नानादिनेति शेषः । एवञ्च ।
“स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः ॥”
इति कालिकापुराणीयमशुचिविषयम् ॥
अनुपनीतविषयमिति श्रीदत्तः । बह्वृचगृह्यपरिशिष्टम् ।
“अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम् ॥
कालिकापुराणे ।
“यो यद्देवार्च्चनरतः स तन्नैवेद्यभक्षकः ।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत् ॥”
इति तिथ्यादितत्त्वम् ॥*॥
अन्यच्च ।

ब्रह्मोवाच ।

“शिवरात्रिव्रतं वक्ष्ये कथाञ्च सर्व्वकामदाम् ।
यथा च गौरी भूतेशं पृच्छति स्म परं व्रतम् ॥

श्रीमहादेव उवाच ।

माघफाल्गुनयोर्म्मध्ये या च कृष्णा चतुर्द्दशी ।
तस्यां जागरणाद्रुद्रः पूजितो भुक्तिमुक्तिदः ॥
कामयुक्तो हरः पूज्यो द्वादश्यामिव केशवः ।
उपोषितैः पूजितः सन्नरकात्तारयेत्तथा ॥
निषादश्चार्व्वुदे राजा पापी सुन्दरसेनकः ।
स कुक्कुरैकसंयुक्तो मृगान् हन्तुं वनं गतः ॥
मृगादिकमसंप्राप्य क्षुत्पिपासार्दितो गिरौ ।
रात्रौ तड़ागतीरे स निकुञ्जे जाग्रदास्थितः ॥
तत्रास्ति लिङ्गं स्वं रक्षन्शरीरं चाक्षिपत्ततः ।
पर्णानि चापतन्मूर्द्ध्नि लिङ्गस्यैवं न जानतः ॥
तेन धूलिनिरोधाय क्षिप्तं नीरञ्च लिङ्गके ।
शरः प्रमादेनैकस्तु प्रच्युतः करपल्लवात् ॥
जानुभ्यामवनीं गत्वा लिङ्गं स्पृष्ट्वा गृहीतवान्
एवं स्नानं स्पर्शनञ्च पूजनं जागरोऽभवत् ॥
प्रातर्गृहागतो भार्य्यादत्तान्नं भुक्तवान् स च ।
काले मृतो यमभटैः पाशैर्बद्धा तु नीयते ॥
तदा मम गणैर्युद्धे जित्वा मुक्तीकृतः स च ।
कुक्कुरेण सहैवाभूद्गणो मत्पार्श्वगोऽमलः ॥
एवमज्ञानतः पुण्यं ज्ञानात् पुण्यमथाक्षयम् ।
त्रयोदश्यां शिवं पूज्य कुर्य्यात्तन्नियमं व्रती ॥
प्रातर्देव चतुर्द्दश्यां जागरिष्याम्यहं निशि ।
पूजां दानं जपं होमं करिष्याम्यात्मशक्तितः ॥
चतुर्द्दश्यां निराहारो भूत्वा शम्भो परेऽहनि ।
भोक्ष्येऽहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वर ॥
पञ्चगव्यामृतैः स्नात्वा अन्तकाले गुरुं श्रितः ।
ॐ नमो नमः शिवाय गन्धाद्यैः पूजयेद्धरम् ॥
तिलतण्डुलव्रीहींश्च जुहुयात् स्वसृतं चरुम् ।
हुत्वा पूर्णाहुतिं दद्यात् शृणुयाद्गीतसत्कथाम् ॥
अर्द्धरात्रे त्रियामे च चतुर्थे च पुनर्यजेत् ।
मूलमन्त्रं तथा जप्त्वा प्रभाते च क्षमापयेत् ॥
अविघ्नेन व्रतं देव त्वत्प्रसादात् समर्पितम् ।
क्षमस्व जगतां नाथ त्रैलोक्याधिपते शिव ॥
यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितम् ।
त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम् ॥
प्रसन्नो भव मे श्रीमन् मद्गृहं प्रतिगम्यताम् ।
तदालोकनमात्रेण पवित्रोऽस्मि न संशयः ।
भोजयेद्ध्याननिष्ठांश्च वस्त्रच्छत्रादिकं ददेत् ॥
देवादिदेव भूतेश लोकानुग्रहकारक ।
यन्मया श्रद्धया दत्तं प्रीयतां तेन मे प्रभुः ॥
इति क्षमाप्य च यतीन् कुर्य्यात् द्वादशवार्षिकम्
कीर्त्तिश्रीपुत्त्रराज्यादि प्राप्य शैवं पुरं व्रजेत् ॥
द्वादशस्वपि मासेषु प्रकुर्य्यादिह जागरम् ।
यतीन् द्वादश संपूज्य दीपदः स्वर्गमाप्नुयात् ॥”
इति गारुड़े शिवरात्रिव्रतकथा १२४ अध्यायः ॥

शिवलिङ्गं, क्ली, (शिवस्य लिङ्गम् ।) महादेवस्य शेफः । तस्योत्पत्तिर्यथा,—
“तत्रापि गत्वा मदनो ददर्श वृषकेतनम् ।
दृष्ट्वा प्रहर्त्तुकामोऽस्य ततः स प्राद्रवद्धरः ॥
ततो दारुवनं घोरं मदनाभिसृतो हरः ।
विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः ॥
ते चापि ऋषयः सर्व्वे दृष्ट्वा मूर्द्ध्ना नताभवन् ।
ततस्ता[illegible]ह भगवान् भिक्षां मे प्रतिदीयताम्
ततस्[illegible]ननस्तस्थुः सर्व्व एव महर्षयः ।
तदाश्रमाणि पुण्यानि परिचक्राम नारद ! ॥
तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः ।
प्रक्षोभमगमन् सर्व्वा हीनसत्त्वाः समन्ततः ॥
ऋते त्वरुन्धतीमेनामनसूयाञ्च भाविनीम् ।
एताभ्यां भर्त्तृपूजासु कृतं वै सुस्थिरं मनः ॥
ततः संक्षुभिताः सर्व्वा यत्र याति महेश्वरः ।
तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः ॥
त्यक्त्वाश्रमाणि शून्यानि स्वानि ता मुनियोषितः ।
अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम् ॥
ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसौ मुने ।
क्रोधान्विताब्रुवन् सर्व्वे लिङ्गोऽस्य पततां भुवि
ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयत् ।
अन्तर्द्धानं जगामाथ त्रिशूली नीललोहितः ॥
ततस्तत्पतितं लिङ्गं विभिद्य वसुधातलम् ।
रसातलं विवेशाशु ब्रह्माण्डं चोर्द्धतोऽभिनत् ॥
ततश्चचाल पृथिवी गिरयः सरितो नगाः ।
पातालभुवनाः सर्व्वे जङ्गमाजङ्गमाः स्थिताः ॥
संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः ।
जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् ॥
तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः ।
उवाच देव भुवनाः किमर्थं क्षुभिता विभो ॥